श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ आकाशनगरीशमङ्गळम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to **Sri. L. Ramarajan** of California for providing the printed text and **Dr. Desikan Parthasarathy** of Bangalore for proof-reading this document.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ आकाशनगरीशमङ्गळम् ॥

श्रीमद्व्योमपुरीशाय भूदेव्या गृहमेधिने।
पुत्रपौत्रादिपूर्णाय ब्रह्माद्यैरस्तु मङ्गळम्॥ १ ॥

मार्कण्डेयर्षिमान्याय खण्डितामरशत्रवे।
पुण्डरीकदळाक्षाय महीनाथाय मङ्गळम्॥ २ ॥

शठवैरिकलिध्वंसिसरोवेतालसूरिभिः।
नित्यस्तुतपदाब्जाय धरणीशाय मङ्गळम्॥ ३ ॥

वेदान्तदेशिकमुखैराचार्यैरर्चिताङ्घ्रये॥
आकाशनगरीशाय वसुधेशाय मङ्गळम्॥ ४ ॥

हेममुक्तामणिव्योमपुरीशा मत्पतिस्तथा।
इति पञ्चावताराय निस्तुलेशाय मङ्गळम्॥ ५ ॥

घटयित्रे दुर्घटानां समाहर्त्रे च संपदाम्।
विनिहन्त्रे च विपदां महीभर्त्रेऽस्तु मङ्गळम्॥ ६ ॥

लावण्यनिधयेऽपास्तलवणाय महीकृते।
कारुण्येनावतीर्णाय शरण्यायास्तु मङ्गळम्॥ ७ ॥

शुद्धानन्दविमानेऽस्मिन् स्वयंव्यक्ताय तेजसे।
अहोरात्रसरस्तीरपारिजाताय मङ्गळम्॥ ८ ॥

मार्कण्डेयस्य तार्क्ष्यस्य धर्मसह्यजयोरपि।
प्रत्यक्षायाम्बुजाक्षाय धरानाथाय मङ्गळम्॥ ९ ॥

भूमिदेवीसमेतस्य श्रीनिवासस्य भक्तितः।
मङ्गळाशासनमिदं पठतामस्तु मङ्गळम्॥ १० ॥

मङ्गळाशासनपरैर्मदाचार्यपुरोगमैः।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गळम्॥ ११॥

यावदावर्तते चक्रं यावती च वसुन्धरा।
तावत् त्वमिह सर्वस्य स्वामित्वमनुवर्तय॥ १२॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

तपस्ये फाल्गुने मासे एकादश्यां तिथौ मुने।
पुण्ये श्रवणनक्षत्रे मुहूर्तेऽभिजिदाह्वये॥

आजगाम महायोगी साक्षान्नारायणो हरिः॥
स देवः श्रीनिवासाख्यो भूमिदेव्याः पतिर्विभुः॥

वसुन्धराविवाहार्थं लोकानुग्रहकाम्यया।
श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम्।
श्रीमद्व्योमपुरीशाय श्रीनिवासाय मङ्गळम्॥

॥ इति आकाशनगरीशमङ्गळं समाप्तम्॥